P.G-3rd Sem – Dhanyāloka    Name – Barnali Banerjee

⊛ **ধ্বনের্লক্ষণং বিমর্শতাম্।**

ধ্বন্যালোককার আনন্দবর্ধনাচার্যঃ ধ্বনিসম্প্রদায়স্য প্রবর্তকঃ। তস্য মতানুসারং কাব্যস্যাত্মা ধ্বনিরিতি সিদ্ধান্তঃ বুধৈঃ সমাম্নাতপূর্বঃ। আনন্দবর্ধনঃ ধ্বনিবিরোধীনাং মতানি খণ্ডয়িত্বা ধ্বনেঃ স্বরূপং তদ্ভেদোপভেদাংশ্চ প্রতিপাদ্য ধ্বনেঃ কাব্যাত্মত্বং ব্যবস্থাপিতবান্।

**ধ্বনিশব্দস্য ব্যুৎপত্তিঃ—**

বুধৈঃ ধ্বনিশব্দস্য ব্যুৎপত্তিঃ পঞ্চবিধা ক্রিয়তে

1. ধ্বনতি ধ্বনয়তি বা যঃ সঃ ব্যঞ্জকঃ শব্দো ধ্বনিঃ।
2. ধ্বনয়তি ধ্বনয়তি বা যঃ সঃ ব্যঞ্জকোঽর্থো ধ্বনিঃ।
3. ধ্বন্যতে যঃ স ব্যঙ্গ্যোঽর্থো ধ্বনিঃ।
4. ধ্বন্যতে অনেন ইতি ব্যঞ্জনাব্যাপারো ধ্বনিঃ।
5. ধ্বন্যতেঽস্মিন্নিতি ধ্বনিঃ অর্থাৎ যস্মিন্ বস্তু-অলঙ্কার-রসাদয়ো ধ্বনিতাঃ ভবতি তৎ কাব্যং ধ্বনিকাব্যম্।

**ধ্বনিসিদ্ধান্তঃ স্ফোটবাদশ্চ :→**

ধ্বনিবাদিনঃ বৈয়াকরণানাং স্ফোটসিদ্ধান্তম্ অনুসরন্তি। তদুক্তং ধ্বন্যালোকে— "প্রথমে হি বিদ্বাংসঃ বৈয়াকরণাঃ, ব্যাকরণমূলত্বাৎ সর্ববিদ্যানাম্; তে চ শ্রূয়মাণেষু বর্ণেষু ধ্বনিরিতি ব্যবহরন্তি। তথৈব অন্যৈঃ তন্মতানুসারিভিঃ কাব্যতত্ত্বার্থদর্শিভিঃ বাচ্য-বাচকসম্মিশ্রঃ শব্দাত্মা কাব্যমিতি ব্যপদেশ্যো ব্যঞ্জক

সাধ্যাদ্ ধ্বনিরিতি।

ধ্বনের্লক্ষণম্ :-

ধ্বনের্লক্ষণং প্রতিপাদয়তা ধ্বন্যালোককারেণ ধ্বন্যালোককারেণ আনন্দবর্ধনাচার্যেণ প্রোক্তম্ –

॥ যত্রার্থঃ শব্দো বা তমর্থমুপসর্জনীকৃতস্বার্থৌ।
ব্যঙ্ক্তঃ কাব্যবিশেষঃ স ধ্বনিরিতি সূরিভিঃ কথিতঃ॥

ধ্বনিকারমতমনুসৃত্য মম্মটেনাপি কথিতম্ –

ধ্বনিনামকরণে অলঙ্কারশাস্ত্রিণঃ বৈয়াকরণান্ অনুসরন্তি। পতঞ্জলিপ্রভৃতিভিঃ বৈয়াকরণৈঃ অর্থপ্রত্যায়কত্বেন প্রধানভূতো যঃ স্ফোটঃ তদ্রূপস্য যদ্ ব্যঞ্জকং তদ্ব্যঞ্জকস্য শব্দস্য ধ্বনিরিতি ব্যবহারঃ কৃতঃ। তদনুসারিভিঃ আলঙ্কারিকৈরপি ব্যঙ্গ্যব্যঞ্জনক্ষমস্য কাব্যস্য ধ্বনিরিতি ব্যবহারঃ কৃতঃ। ~~তদনুসারিভিঃ~~ মম্মটেন ধ্বনিকাব্যম্ উত্তমকাব্যং প্রোক্তম্।

উদাহরণং যথা –

"নিঃশেষচ্যুতচন্দনং স্তনতটং নির্মৃষ্টরাগোঽধরো
নেত্রে দূরমনঞ্জনে পুলকিতা তন্বী তবেয়ং তনুঃ।
মিথ্যাবাদিনি দূতি বান্ধবজনস্যাজ্ঞাতপীড়াগমে
বাপীং স্নাতুমিতো গতাসি ন পুনস্তস্যাধমস্যান্তিকম্"॥

অত্র তদন্তিকমেব রন্তুং গতাসীতি প্রাধান্যেন অধমপদেন ব্যজ্যতে। অতঃ ইদং ব্যঙ্গ্যস্য প্রাধান্যাৎ উত্তমকাব্যমিতি ধ্বনিকাব্যং দ্বিবিধম্ – লক্ষণামূলকম্ – অভিধামূলকং চেতি। তত্রাদ্যম্ অবিবক্ষিতবাচ্যম্ অন্যৎ বিবক্ষিতান্যপরবাচ্যম্।

ধ্বনিবিরোধিন: আচার্যা:—

কুন্তকমহিমভট্টাদয়: আচার্যা: ধ্বনিসিদ্ধান্তস্য বিরোধম্ অকুর্বন্, অলঙ্কারসর্বস্ব টীকাকারো জয়রথো ধ্বনিবিরোধিনাং দ্বাদশ মতানি বর্ণিতবান্।

আনন্দবর্ধন: ধ্বন্যালোকে বিরোধী মত খণ্ডন-পূর্বকং ধ্বনিসিদ্ধান্তং স্থাপিতবান্। তেন এষ: ধ্বনিবিরোধিন: সিদ্ধান্ত: উপস্থাপিতবান্—

ক) অভাববাদ:
খ) ভাক্তবাদ:
গ) অনির্বচনীয়তাবাদ:।

ক) অভাববাদ:— অভাববাদিনাং এষ: বিকল্পা: সম্ভবন্তি,
১) প্রথমবিকল্পানুসারং শব্দার্থশরীরং তাবৎ কাব্যম্,
২) দ্বিতীয়বিকল্পানুসারং নাস্ত্যেব ধ্বনি:
৩) তৃতীয়বিকল্পানুসারং বাচ্যশোভাবর্ধক হেতব: গুণালঙ্কারাদিভ্য: ব্যতিরিক্তং কিঞ্চিদপি সৌন্দর্যাধিক্য তত্ত্বং নাস্তি।

খ) ভাক্তবাদ:— ভাক্তবাদিন: ধ্বনিং ভক্তে: বিষয়ং মন্যন্তে। তদাহ ধ্বনিকার: — "ভাক্তমাহুস্তমন্যে", অত্র ভক্তিশব্দেন লক্ষণা উচ্যতে।

গ) অনির্বচনীয়তাবাদ: অলক্ষণীয়তাবাদ:— কেচন এতং ধ্বনিং অলক্ষণীয়ং। পরন্তু এতদ্ ন যুক্তিযুক্তং ইতি ধ্বনিকারস্য মতম্।